
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ इतिआश्वलायनअग्निहोत्रप्रायश्चित्तं॥

श्रीगणेशाय नमः ॥ अथ आश्वलायनोक्त प्रायश्चित्तं ॥ अथ आश्वलायना
नां जपानुमंत्रण होमादौ विशेषानुक्तौ ब्रह्मैव कर्त्ता ॥ पात्रानुक्तजुहूः ॥ वचनाच्च
तुर्गृहीतं ॥ अन्यत्र सकृद्गृहीतं ॥ वह्निविविशेषावाहनीय होमः ॥ कर्तृविशे
षानुक्ताध्वर्युः ॥ अथ यज्ञोपवीतिना बद्धशिखेन पवित्रपाणिना बद्धकच्छे
न आचांतेन स्नातेन शुचिना प्राग्दक्षिणेन अंतर्जानुहस्तेन विहितं कर्म क
र्तव्यं ॥ ॥ अथ आधान प्रायश्चित्तं ॥ ॥ सर्वाधानपक्षे प्राक्पाकात् ॥ ब्रह्मौद
नाग्निनाशन प्रायश्चित्तं ॥ ब्रह्मौदनाग्निलोपजनित० करिष्ये ॥ श्रोत्रियागारा
दग्निमाहृत्य स्थंडिलादि कृत्वा ॥ अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया
असि ॥ अयासा वयसा कृतोयासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा ॥ अग्नेअ

यसइदं ०॥ सर्वप्रायश्चित्तं करिष्ये॥ भूर्भुवः सुवस्वाहा॥ प्रजापतय इदं ०॥ ब्रह्मौद
नादि समापयेत्॥ आद्धोधानपक्षे तु एकदेशमाहृत्य सर्वप्रायश्चित्तं॥ ब्रह्मौदनं
कार्यं॥ आपस्तंबानां तु विशेषः॥ योनितउत्पाद्य श्रोत्रियागाराद्वाविहृत्य सर्वं
पूर्ववत्॥ ब्रह्मौदनपाकादूर्ध्वं अरणीनिष्टपनाद्दूत्पूर्वं॥ अग्न्यनुगमने पूर्वं
वदग्निमुत्पाद्य॥ अयाश्चेति सर्वप्रायश्चित्तं॥ पुनर्ब्रह्मौदनादि कार्यं॥ मंथनानं
तरं जातस्याग्नेर्निवर्त्तमानजपात्पूर्वं अनुगमने पुनर्मंथनं॥ न तत्र प्रायश्चित्तं॥
निवर्त्तमानजपश्च॥ उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनः प्रजानन्
॥ आयुः प्रजां रयिमस्मासु धेह्यजस्रो दीदिहि नो दुरोणे॥ इति जपः॥ स्फुलिं
गमात्रमवशिष्यते चेदपि तदनादृत्य पुनर्मंथनं॥ जाते निवर्त्तमानजपे संभारे

२

षुनिधानास्याग्न्यनुगमने तं प्रयोगं परिसज्यकालांतरआदधीत॥ केचित्तु॥
अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थय
थातथं॥ पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः॥ अग्नेतदस्यकल्पयत्वꣳहि
वेत्थयथातथं॥ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः॥ अग्नि
ष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाꣳऋतुशोयजाति॥ इतिजपित्वा॥ पुनर्मथ
नमाहुः॥ अथदक्षिणाग्नेरुद्धरणानंतरंसंभारेषुनिधानास्याग्न्यनुगमनेप्राय
श्चित्तं॥ दक्षिणाग्निलोपजनितप्रा०॥ अनाज्ञातत्रयंजपंकरिष्ये॥ जपंकृत्वा
पुनरुद्धरणं॥ संभारेषुनिधानास्याकूनिधानोत्तरंवा आवहवनीयानुगम
नेप्रायश्चित्तं॥ आहवनीयानुगमनजनितप्र० करिष्ये॥ भूर्वस्वाहा॥ दक्षिणा

२

(५)

ग्नौ हुत्वा॥ पुनरुध्दृत्य आहवनीये निदध्यात्॥ दक्षिणाग्निस्थापनात्पूर्वं उध्दृ
ताहवनीयानुगमने॥ अनाज्ञातत्रयं जपित्वा॥ पुनरुद्धरणं॥ अथ आधा
नोत्तरं इष्ट्यान्वाधात्पूर्वं गार्हपत्यानुगमने प्रायश्चित्तं॥ गार्हपत्य भस्मनार
णा संस्पृश्य॥ उपावरोहेति मथित्वायतने निधाय॥ गार्हपत्यनुगमनजनित
प्र० मित्रादिहोमं करिष्ये॥ मित्राय स्वाहा। मित्राये दं०॥ वरुणाय०॥ वरुणाये
दं॥ अग्नये० अग्नय इदं॥ अग्नये व्रतपतये स्वाहा॥ अग्नये व्रतपतय इदं॥
अग्नये तपस्वते जनद्वते पावकवते स्वाहा॥ अग्नये तपस्वते जनद्वते पावक
वत इदं॥ अग्नये शुचये स्वाहा॥ अग्नये शुचय इदं॥ अग्नये ज्योतिष्मते स्वा
हा॥ अग्नये ज्योतिष्मत इदं॥ सूर्याय स्वाहा॥ सूर्याये दं॥ भूः स्वाहा॥ अग्नय

८

३

इदं ॥ भुवः स्वाहा ॥ वायव इदं ॥ सुवः स्वाहा ॥ सूर्यायेदं ॥ भूर्भुवः सुवः स्वाहा ॥ प्रजापत
य इदं ॥ १२ ॥ नात्र तपस्वतीष्टिः ॥ आधाने ष्टेः ॥ प्रागिष्ट्यंतरप्रवत्स्यनुपपत्तेः ॥ अ
थाग्न्यनुपस्थासूर्योदयात्प्राग्गार्हपत्याधानासंभवे तं प्रयोगं परित्यज्य कालां
तरमादधीत ॥ केचित्तु कालस्यागत्वात्तल्लोपे गार्हपत्याधानासंभवजनित
प्र० ॥ अनाज्ञातत्रयं सर्वप्रायश्चित्तं हुत्वा ॥ गार्हपत्याधानं कर्तव्यं ॥ तच्च प्रा
यश्चित्तं शिवा जपांते गार्हपत्यं कर्तव्यं ॥ अथ आहवनीयाधाने मेघादिना सू
र्यनपश्ये त्तदा प्रायश्चित्तं ॥ सूर्यादर्शनजनितप्र० थे ॥ उद्वयं तमसस्परि प
श्यंतो ज्योतिरुत्तरं ॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमꣳ स्वाहा ॥ सूर्या
इदं ॥ उदु त्यं जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वाय सूर्यꣳ स्वाहा ॥ सू

३

(८)

र्यायेदं॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्या
वापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चस्वाहा॥ सूर्यायेदं॥
अथआधानोत्तरमिष्ट्यर्थमन्वाधानेकृतेअग्न्यनुगमनेसर्वेषांअ
न्वाहितप्रायश्चित्तं॥ तत्रआहवनीयानुगमनजनितं करिष्ये॥ अन्व
ग्निरुषसामग्रमख्यदन्वहानिप्रथमोजातवेदाः॥ अनुसूर्यस्यपुरु
त्राचरश्मीननुद्यावापृथिवीआततान॥ इतिमंत्रेणाहवनीयंप्रणीय॥ भूः
इत्युपस्थाय॥ स्रुवेणाहवनीयंजुहोति॥ योअग्निंदेववीतयेहविष्मांआ
विवासति॥ तस्मैपावकमृडयस्वाहा॥ अग्नयेपावकायेदं॥ इदंविष्णुर्वि
चक्रमेत्रेधानिदधेपदं॥ समूढमस्यपांसुरेस्वाहा॥ विष्णवइदं॥ ततो

४

नतोयजमानो जपति॥अग्नेयैव्रतपतये० वायोव्रतपते० व्रतानांव्रतपते
०राध्यासं॥गार्हपत्योनुगच्छेत्तदाभस्मनारणीसंस्पृश्य॥इतोजज्ञेप्रथम
मेभ्योयोनिभ्योअधिजातवेदाः॥सगायत्र्यात्रिष्टुभाजगत्यानुष्टुभाच देवेभ्यो
हव्यंवहनःप्रजानन्॥इतिमथित्वागार्हपत्यंसंनिधाय॥भूरित्युपस्थाय॥यो
अग्निंदेववीतये०॥इदंविष्णु०॥अग्नेव्रतपत इत्यादितेनराध्यासमित्यंतं
पूर्ववत्॥दक्षिणाग्न्यनुगमनजनितं०करिष्ये॥योनितस्त्रूर्ध्वीमुत्पाद्य
भूरित्युपस्थाय॥यो अग्निर्देववी०॥इदं विष्णुर्वि०॥अग्नेव्रतपतइत्यादि
तेनराध्यासमितिपूर्ववत्॥इत्यन्वाहितप्रायश्चित्तं॥अथदेवताथाज्यानु
वाक्याआज्यावदानहविषिविपर्यासप्रायश्चित्तं॥तत्रदेवताविपर्यास

४ राम

जनित० ष्ये ॥ यद्वो देवा अतिपातयानि वाचा च प्रयुती देवहेळनं ॥ अरायो
अस्मा ँ अभिदुच्छुनायते न्यस्त्रास्मन्मरुत स्तं निधेतन स्वाहा ॥ मरुद्भ्य इदं ॥ ज
पेद्वा ॥ अथावदानातिरेके न्यूने द्वा प्रायश्चित्तं ॥ अवदानातिरेके वा जनित प्र
० ष्ये ॥ यदस्मिन्युज्ञेंतरगाम मंत्रतः कर्मतो वा ॥ अनया हुत्या तच्छमयामि स
र्वं तत्प्यंतु देवा आवेषतां घृतेन स्वाहा ॥ देवेभ्य इदं ॥ यदस्य कर्मणो त्यरीरिचं
यद्वा न्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वांसर्वं स्विष्टं सुहुतं करोतु स्वाहा ॥
अग्नये स्विष्टकृत इदं ॥ द्वाभ्यां जुहुयाज्जपेद्वा ॥ अथानादिष्टप्रायश्चित्तं ॥ अ
नाज्ञातं त्रयं सर्वप्रायश्चित्तं च जुहुयाज्जपेद्वा ॥ अथ ब्रह्मौदनस्थाली भेदप्रा
यश्चित्तं ॥ ब्रह्मौदनस्थाली भेदं जनित० करिष्ये ॥ अभिं नो घर्मो जीरदानु येत आ

५

र्तेस्त्वदग्नस्तु नः ॥ इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनु संतरंतु ॥ इति स्था
लीमभिमृश्य तां अप्सु प्रक्षिप्यान्यमानीय सर्वप्रायश्चित्तं ॥ ब्रह्मौदनाग्नौ जुहु
यात् ॥ इति ब्रह्मौदनस्थालीपाकप्रायश्चित्तं ॥ अथ संभारनाशप्रायश्चित्तं
॥ अन्यान्संभारानानीय ॥ संभारनाशजनितं प्रां करिष्ये ॥ त्वमग्ने अया
स्ययासन्मनसा हितः ॥ अयासन्हव्यमूहिषेयानो धेहि भेषजं स्वाहा ॥ अग्न
येऽयस इदं ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ॥ यत्कामा
स्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा ॥ प्रजापतय इदं ॥ ब्रह्मौ
दनाग्नौ स्रुवेण जुहुयात् ॥ इति संभारनाशप्रायश्चित्तं ॥ अथ आधानोत्तरं
अग्निहोत्रारंभात्पूर्वं यदि पत्नी रजस्वला तदा चतुर्थे दिवसे सायंकाले सप्तहो

५

(10)

तारं हुत्वा ॥ महाहविर्होता ॥ सत्यहविरध्वर्युः ॥ अच्युतपाजा अग्नीत् ॥ अच्यु
तमना उपवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ ॥ अयास्य उद्गा
ता ॥ वाचस्पते हृद्विधे नामन् ॥ विधेम ते नाम ॥ विधेस्त्वमस्माकं नाम ॥ वाचस्प
तिः सोमं पात् ॥ मा दैव्यस्तन्तुश्छेदि मा मनुष्यः ॥ नमो दिवे ॥ नमः पृथिव्यै स्वाहा
वाचस्पतये ब्रह्मण इदं ॥ होमारंभः ॥ यदि रजस्वलाश्रोताग्निं संस्पृशति तदा पु
नराधानमेव कृत्वा ॥ शुचीष्टिः कर्तव्या ॥ आधानोत्तरं केनचित्प्रतिबंधेनाग्नि
होत्रहोमारंभो न कृतस्तदा द्वितीयादिवसे सायाह्ने सप्तहोतारं हुत्वा होमारं
भः ॥ अग्निहोत्रहोमे ॥ यदग्ने यानि कानि चाति दारूणि दध्मसि ॥ तदस्तु तु
भ्यमिद्घृतं तज्जुषस्व यविष्ठ्य ॥ इति मंत्रेण उपसमिंधनादूर्ध्वमाहवनीयहो

(11)

८८

मात्पूर्वं॥यदियजमानोऽभीयात्सिवेद्वा॥तदा॥यन्नेवयंपुरुषत्रायविष्ठाविद्वांऽस
श्चकृमाकच्चनागः॥कृधीष्वस्माँऽअदितेरनागाव्येनांऽसिशिश्रथोविष्वगग्ने॥
अग्नयेस्विष्टकृतइदं॥यथाहत्यद्वसवोगौर्यंचित्पदिषितामसुंचतायजत्राः॥
एवात्वस्मत्प्रमुमुचाव्यंऽहःप्रातार्यग्नेप्रतरांनआयुःस्वाहा॥अग्नयेस्विष्टकृ
तइदं॥इतिद्वाभ्यांजुहुयात्॥जपेद्वा॥उपसमिंधनात्पूर्वंचेत्तदाव्रतपतेष्टिः॥
पूर्णाहुतिर्वा॥इत्याधानप्रकरणं॥अथाजस्रप्रकरणं॥तत्रसमानयोनित्वे
आहवनीयदक्षिणाग्न्योर्विद्यमानयोर्गार्हपत्योनुगच्छेत्तदाउभयोरप्यनु
ग म्यभस्मनारणीसंस्पृश्य॥इतोजज्ञेप्रथममेभ्योयोनिभ्योअधिजातवेदाः
॥सगायत्र्यात्रिष्टुभाजगत्यानुष्टुभाचदेवेभ्योहव्यंवहनःप्रजानन्॥इतिमथि

६

10

त्वा यजमानो मंत्रं ब्रूयात् ॥ जाते गार्हपत्याय तन्ने निधाय तूष्णीमुभयोः प्रणय
नं कृत्वा ॥ अग्ने सम्राळसि षेरायेरमस्व सहसे द्युम्नायोर्जे पत्याय ॥ सम्राळसि
स्वराळसि सारस्वतौ त्वोत्सौ प्रावतामन्नादं त्वान्नपत्याय दधेत् ॥ अग्ने नमं
त्रेणाहवनीयमुपस्थाय ॥ ततः अग्न्यनुगतजनितप्रा० करिष्ये ॥ तपस्वते ष्टि
स्थाने पूर्णाहुतिः ॥ गार्हपत्ये विद्यमाने आहवनीयोनुगच्छेत्तदा स्वनितउत्पा
द्य ॥ तपस्वतिः पूर्णाहुतिः ॥ एवं दक्षिणाग्न्यनुगमने ॥ तपस्वतिः पूर्णाहुतिर्वा ॥
सर्व प्रायश्चित्तं वा ॥ अथ गार्हपत्ये विद्यमाने उभयानुगमने ॥ पुनरुभयोः स्वयो
नितः स्तुष्णीं प्रणयनं कृत्वाहवनीये ॥ तपस्वतिः पूर्णाहुतिः ॥ दक्षिणाग्नेनुउक्ते
प्रायश्चित्तं ॥ अथ सर्वेषामनुगमने उदयास्तमयौ भवतश्चेत्पुनराधानं ॥ त

13

त्रारण्युदयास्ताभ्यां प्राक्मंथनप्रसक्तौ तु न तत्॥ समानयोनित्वेव्यवस्थेयं॥भिन्नयोनित्वे तु आहवनीयदक्षिणाग्न्योर्विद्यमानयोर्गार्हपत्योनुगच्छेत्तदा अवक्षामेभ्यो गार्हपत्यं मथित्वा॥ आहवनीयमात्रमनुगमयित्वा अवक्षामेभ्यो आहवनीयं मथित्वायतनेनिधाय॥ अग्नेसम्राळिषस्युपस्थाय॥ गार्हपत्यानुगमनजनितं॰ करिष्ये॥ तपस्वतेष्टिः पूर्णाहुतिः॥ अथ गार्हपत्यविद्यमाने आहवनीयोनुगच्छेत्तदा॥ अवक्षामेभ्यो आहवनीयं मथित्वायतनेनिधाय॥ आहवनीयानुगमनजनितं॰ करिष्ये॥ तपस्वतिः पूर्णाहुतिः॥ गार्हपत्याहवनीयविद्यमाने दक्षिणाग्न्यनुगमे॥ अवक्षामेभ्या मथित्वायतनेनिधाय॥ तपस्वतिः पूर्णाहुतिः॥ सर्वप्रायश्चित्तं वा कार्यं॥ अथ गार्हपत्यविद्यमाने उभयानुगमे प्रायश्चि

त्तं सूक्तं ॥ अथाजस्रेण प्रणीतेन वा सह गार्हपत्यानुगमे उदयास्तौ भवतश्चेत्पुन

राधानं ॥ तत्राप्युदयस्ताभ्यां प्राक् मंथनप्रवृत्तौ तु मननं ॥ इत्यजस्रप्रकरणं ॥ अ

थाग्निहोत्रप्रकरणं ॥ अथाग्निहोत्रे ग्न्यनुगतप्रायश्चित्तं ॥ अथ गार्हपत्यानुगम

नप्रायश्चित्तं ॥ गार्हपत्यभस्मनारणीसंस्पृश्य ॥ इतो जज्ञे इति मथित्वा गार्हप

त्यायतने निधाय ॥ तूष्णीमाहवनीयं प्रणीय ॥ गार्हपत्यानुगमनजनि० ष्ये ॥ तप

स्वते ष्टिस्थाने पूर्णाहुतिं होष्यामि ॥ अग्नये तपस्वते जनद्वते पावकवत इदं ॥ स

र्वे प्रायश्चित्तं ॥ तमग्निं परिसज्य प्रकृतिवत्प्रणीय होमः कार्यः ॥ इति गार्हपत्यानु

गमनप्रायश्चित्तं ॥ गार्हपत्ये विद्यमाने उभयानुगमे पुनस्तूष्णीं प्रणीय ॥ दक्षिणा

ग्नि आहवनीय नुगमनजनित० करिष्ये ॥ तपस्वते ष्टिः पूर्णाहुतिः ॥ सर्वे प्रायश्चि

15

८

त्तं दक्षिणाग्नौ वा॥ अथ आहवनीयविद्यमाने गार्हपत्योनुगच्छेत्तदा भस्मनारणी
संस्पृश्य॥ इतो जज्ञेति मथित्वा॥ आहवनीयानुगमयित्वा॥ समानयोनित्वेद
क्षिणोपि॥ जातो अग्निरायतनेन निधाय प्रणयन मंत्रेण प्रणीय॥ अग्ने सम्रा
ळिषेत्यनेन मंत्रेणाहवनीयमुपतिष्ठेत॥ ततस्तपस्वतीष्टिः॥ सर्वेषामनुगम
ने उदयास्तौ भवतश्चेत्पुनराधानं॥ उदयास्ताभ्यां प्राक्मंथन प्रवृत्तौ तु न पु
नराधानं॥ अथाग्निहोत्रद्रव्या [illegible] श्रयणार्थं उध्दृतस्याग्ने गार्हपत्यस्य चोभ
योर्नाशे प्रायश्चित्तं॥ भस्मनारणी संस्पृश्य॥ इतो जज्ञेति मथित्वायतने निधाय
तपस्वतीः पूर्णाहुतिः॥ पुनरंगारनिर्हरणादि होमं समापयेत्॥ इत्यग्निहोत्राधि
श्रयणार्थं यां प्रायश्चित्तं॥ अथ अपोढानुगमने प्रा०॥ अपोढाग्निलोपज

८

16

नितं॰ष्ये॥सर्वप्रायश्चित्तमाहवनीयेहुत्वा॥भुवस्वाहा॥वायवइदं॥दक्षिणा
ग्नौहुत्वा॥पुनरपोह्य॥अधिश्रयणादिहोमंसमापयेत्॥अपोद्धवर्त्तमाने
गार्हपत्यानुगच्छेत्तदा॥अपोद्धैकदेशेगार्हपत्येनिधाय॥गार्हपत्यानु
गमनजनितं॰करिष्ये॥सर्वप्रायश्चित्तंगार्हपत्ये॥भुवस्वाहा॥इतिद
क्षिणाग्नौ॥इत्यपोद्धाग्निनाशप्रायश्चित्तं॥अथआश्वलायनानामग्निहो
त्रहोमार्थप्रणीताग्निःपूर्वाहुतेःप्रागुपशाम्येतचेत्तदासायंचेत्सुवर्णमम
तःकृत्वाउद्धरेत्॥ततोतत्रदग्न्यनुगमनजनितं॰करिष्ये॥अग्नयेज्योतिष्म
तेवरूणायचेष्टिः॥पूर्णाहुतिर्वा॥ततःप्रकृतिवद्धोमः॥आहवनीयपूर्णाहु
तौ॥हुतायांआहवनीयोनुगच्छेत्तदाहिरण्यंनिधाय॥उत्तरांहुतिंजुहुयात्॥आ

17

९

हवनीयानुगमने जनितं करिष्ये ॥ गार्हपत्ये सर्वप्रायश्चित्तं हुत्वा ॥ हरिस्म
रणं ॥ तच्चस्त्रुवतपनादि निवर्त्तते ॥ आदिशब्देन समिदाधानवर्जं ॥ इत्याह
वनीयानुगमनप्रायश्चित्तं ॥ यद्द्रव्यं स्थालीभेदेन भूमौ पतितं स्कन्नं वा तदा ॥
समुद्रं वः प्रहिणोमि स्वां योनिमपि गच्छत ॥ अरिष्टा अस्माकं वीरा मयि गावः
संतु गोपतौ ॥ इति मंत्रेणाभिमृश्य जलेन प्रतिषिच्य ॥ अन्यद्द्रव्यमुत्पाद्य
होमः ॥ इदं च प्रायश्चित्तमधिश्रयणात्पूर्वं ॥ अधिश्रिते दुग्धे प्राचीनहरणे ॥ प्रा
चीनहरणं च उन्नीय ॥ आहवनीयं प्रतिनयनं तस्मिन्स्कन्ने ॥ प्रजापतेर्विश्वभृ
ति तन्वं हुतमसि ॥ इत्यभिमंत्र्यं शेषेण जुहुयात् ॥ भक्षणाद्यपर्याप्ते सिते
नैव होमः ॥ अशेषस्कंदने स्रुगातस्य तु प्रजापतेरित्यभिमंत्र्य पुनरुन्नीजुहुया

९

त्॥ उंनयने अयं विशेषः॥ प्राचीनहरणे यावतिगते स्कंनं भवति तावत्येव ध्व
नि उपविश्य॥ प्रजापतेर्विश्वभृति तन्वं हुतमसि॥ इत्यभिमंत्र्य स्थालीमन्ये
न प्राचीनीत्वा तत्रैवोपविश्य उन्नयेत्॥ न स्वयं स्रुग्वा प्रत्यागच्छेत्॥ बर्हिस्था
पनोत्तरं स्कंदने अयमेव प्रकारः॥ अथ पयोतिरिक्ते द्रव्ये अधिश्रयणोत्तर
स्कंदने जलेन प्रतिषिच्य॥ दक्षिणेन पाणिनाभिमृश्य॥ दिवं तृतीयं देवान्यज्ञो
गात्ततो मा द्रविणमाष्ट॥ अंतरिक्षं तृतीयं पितॄन्यज्ञो गात्ततो मा द्रविणमाष्ट॥
पयो रोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा॥ या पत्येते अप्रती
ता सहोभिर्विष्णू अगन्वरुणा पूर्वहूतौ॥ इत्यभिमंत्र्य॥ अवशिष्टं दुग्धवत्॥ यदि
स्थाल्यां शेषो न स्यात्तदा आज्यं ग्रहीत्वा॥ यथासंभवं ससूत्रे उंनीय जुहु

१०

यात्॥इति स्कन्नं प्रायश्चित्तं॥अथाग्निहोत्रस्कंदने प्रायश्चित्तं॥अग्निहोत्रद्रव्य
मभिश्रितं शाद्येत्तदाव द्रव्यं॥समोषाभुं॥इत्यभिमंत्र्य॥अमुमित्यस्य स्थाने यजमा
नं देवदत्तनामनिर्दिशेत्॥अधिश्रिते शाद्रजनित०करिष्ये॥सर्वप्रायश्चित्तं हु०॥हो

द्रव्य२

मं समापयेत्॥इत्यग्निहोत्रद्रव्यशादने प्रायप्रायश्चित्तं॥अथ स्कंन प्रा०॥अथो
द्धासन समये विष्यंदते यत्स्कंनं आहवनीयस्य भस्मांते निनीयशेषेण होमः॥
अशेषे द्रव्योत्पत्तिः॥इति स्कंन प्रा०॥अथाधिश्रितमग्निहोत्रद्रव्यं प्रति शेष
कीटादिकमापद्येत तदन्तस्सर्वं स्रुचि प्रक्षिप्याहवनीयं प्राप्य समिधमादाय आ
हवनीयोत्तरतः उष्णभस्मनिः सार्य तस्मिंस्सर्वं जुहुयात्॥प्रजापतेर्विश्वभृति त
न्वं हुतमसि॥इति मंत्रमुच्चरेत्॥उन्नीतेप्येवमेव प्रकारः॥इदं च पयो निरिक्ते द्रव्ये

१०

पयश्चेत्॥ केशकीटानिनाव्यापन्नं मध्यमेनांतमेनवापलाशपर्णेन॥ प्रजाप
तेनत्वदेतान्यन्योविश्वाजातानिपरितानिपरिताबभूव॥ यत्कामास्ते जुहुमस्त
नोअस्तुवयंस्यामपतयोरयीणां॥ इतिमंत्रेण वल्मिकबिले जुहुयात्॥ तूष्णींवा
जले प्रक्षिप्य॥ द्रव्यांतरमुत्पाद्य होमः कार्यः॥ इतिहविर्दोषप्रायश्चित्तं॥ अथाग्नि
होत्रे द्रव्ये वृष्टे प्रायश्चित्तं॥ अग्निहोत्रद्रव्याभिवर्षेणजनितं करिष्ये॥ प्राचीनंहर
णे मित्रोजनान्यातयति ब्रुवाणोमित्रोदाधार पृथिवीमुतद्यां॥ मित्रः कृष्टीरनिमि
षाभिचष्टे मित्रायहव्यंघृतवज्जुहोतस्वाहा॥ समिधमाहवनीयेहुत्वाप्रकृतिवद्धो
मः॥ इत्यभिवृष्टप्रायश्चित्तं॥ अथ पूर्वाहुतौ हुतायां उत्तराहुतिद्रव्यस्कंदने॥ अ
थवा पूर्वाहुतावेवसर्वे पतेत्तदा॥ यत्रवेत्थवनस्पते देवानां गुह्यानामानि॥ तत्र

५

हव्यानिगामय॥इति समिधमाधस्यशेषेण होमः॥अशेषस्कंदने तत्रैवस्थाल्यास्वि
रभ्युंनीय॥यत्रवेत्थवनस्पतेति समिधमाधायोत्तराहुतिप्रभृतिकुर्यात्॥इतिउ
त्तराहुतिद्रव्यस्कंदनेप्रायश्चित्तं॥अथाग्निहोत्रेंतरागमनेप्रा०॥अग्निहोत्रद्रव्ये
कुशेषूपसादिते॥दर्शपूर्णमासेष्टौ हविर्निरुप्ते सति अंतराशाकटश्वापुरुषोवा
गच्छेत्तदागवातिक्रमणंभस्मनाशुनःपदं॥इदंविष्णुर्विचक्रमेमंत्रेधानिदधेपदं॥
समूढमस्यपांसुरे॥इतिमंत्रेणपूरयेत्॥प्रतिपदंमंत्रावृत्तिः॥भस्मधारांउद
कधारां॥तंतुतन्वन्रजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधियाकृतान्॥अ
नुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनं॥अनेनमंत्रेणकुर्यात्॥प्र
तिधारांमंत्रावृत्तिः॥ततः आहवनीयमनुगमयित्वा॥अग्निहोत्रप्रयोगेउ

दुरेणमंत्रेणप्रणीय॥इष्टिप्रयोगे तूर्ष्णी प्रणीय॥यदग्ने पूर्वेप्रहितं पदं हिते
सूर्यस्य रश्मीनन्वातताने॥तत्र रयिष्ठामनुसंभवैतां सं नः सृज सुमत्यावाजव
त्या॥त्वमग्ने सप्रथा असिजुष्टोहोतावरेण्यः॥त्वयायज्ञं वितन्वते॥इत्युपस्था
य॥अंतरागमनजनितं० करिष्ये॥पाथिकृतेष्टिः पूर्णाहुतिर्वा॥इत्यंतराग
मनप्रायश्चित्तं॥अथस्वकालेविहृतेष्वग्निषु होमका‘लातिपत्तौ प्रायश्चित्तं॥
होमकालश्च सायन्नवनाडिका॥प्रातर्दशनाडिका॥तदतिक्रमे संसृतान्यंजु
क्वां चतुर्गृहीत्वा॥कालातिपत्तिजनितं० करिष्ये॥सायंदोषावस्तनेमस्वाहा॥
अग्नय इदं०॥आहवनीयेजुहुयात्॥ततोग्निहोत्रं दुग्ध्वा सादमांतं कृत्वा॥
भूर्भुवस्वः॥इतिजपित्वा वरं दत्वा॥वरस्थाने गोजातिरित्युच्यते तन्मोल्यं

१२

वादत्वाहोमंकुर्यात्॥ समाप्तेहोमेतेष्वेवाग्निवारुणेष्टिः॥ पूर्णाहुतिः॥ प्रातःकाला
तिपत्तौतुविशेषः॥ कालातिपत्तिज० करिष्ये॥ चतुर्गृहीत्वा॥ प्रातर्वस्तनमस्वा
हा॥ अग्नयइदं॥ इतिहुत्वाअग्निहोत्रमुपसाद्य॥ भूर्भुवस्वरितिजपित्वाहोमंकु
र्यात्॥ होमोत्तरकालेत्रयस्त्र्यंतेवरदानंकार्यं॥ ततः आहवनीयमनुगमयित्वा
पुनःप्रणयेत्॥ इहैवक्षेम्यएधिमाप्रहासीः देवदत्तंभारद्वाजमितिपाठः कर्तव्यः॥
ततःइष्टिः मित्रःसूर्योदेवतेसमाप्तायामिष्टौअनश्नंतौवाग्यत्तौपत्नीयजमानौता
वेवाअग्नी ऽन्प्रज्वलंतोअहःशेषमुपासीयातांआसायमास्तेइत्यर्थः॥ ततःसा
यंकालेतेष्वेवाग्निषुहोमः॥ तत्रविशेषः॥ एकस्यागोर्दुग्धमधिश्रियतस्मिन्नेवदु
ग्धेअन्यदुग्धमानयतितेनपयसाहोमंसमाप्यअन्योपवर्गः॥ त्यागइत्यर्थः॥ १२

(२५)

ततः श्वोभूते अग्निव्रतपते इष्टिः पूर्णाहुतिर्वा॥ इदं च स्वकाले विहृतेष्वग्निषु होम
कालातिपत्तौ प्रायश्चित्तं भवति॥ अथ कर्मकाले धूमादिना यजमानाश्रुपाते प्राय
श्चित्तं॥ नानंदाश्रुपाते॥ अश्रुपातजन्यप्रत्यवायं करिष्ये॥ अग्निर्व्रतभृत इष्टिः पू
र्णाहुतिर्वा॥ इत्यश्रुपातप्रायश्चित्तं॥ अथ अनुद्धरणप्रायश्चित्तं॥ अनुद्धृते आह
वनीये यदि सूर्योऽस्तमियात्तदा बहुविद्ब्राह्मणोदर्भे हिरण्यमग्नेः (?) धृत्वा प्रणये
त्॥ ततोऽस्तु च्यासादनांतं कृत्वा भूर्भुवः सुवः॥ इति जपित्वा वरं दत्वा समिदाधानादि
होमं समापयेत्॥ समाप्ते होमे तेष्वेवाग्निषु वारुणेष्टिः॥ इष्ट्यसंभवे अनुद्धरण
जनितo॥ पूर्णाहुतिं होष्यामि॥ वरुणाय स्वाहा॥ वरुणायेदं॥ विष्णुस्मरणं॥ अ
नुद्धृते आहवनीये यदि सूर्योऽभ्युदियात्तदा बहुविद्ब्राह्मणश्चतुर्गृहीतमाज्यं दर्भे

१३

सहितंरजतंचाग्नितोहरंतुद्धरेत्॥ततःआहवनीयस्यपुरस्तात्प्रत्यङ्मुखउपवि
श्य॥उषाःकेतुनाजुषतांस्वाहा॥उषसइदं॥आहवनीयेजुहुयात्॥ततोग्निहो
त्रमुपसाद्य॥भूर्भुवस्वाहा॥इतिजपित्वा॥समिदाधानादिहोमंसमाप्य॥उक्तंते
वरदानेनाहवनीयानुगमनं॥ततस्तेष्वेवाग्निषुइष्टिः॥मित्रः सूर्यः द्वे देवते॥इ
ष्ट्यसंभवे॥अनुद्धरणाजन्यप्रा०करिष्ये॥वारुणेष्टिस्थाने पूर्णा हुतिः॥मित्रायस्वा
हा॥मित्रायेदं॥सूर्यायस्वाहा॥सूर्यायेदं॥आहवनीये हुत्वा॥ततस्तानेवाग्नीन्प्रज्व
लंतः॥अनन्ततौ पत्नीयजमानो आसायमास्तेततस्तेष्वेवाग्निषु कालातिपत्तिव
सायंहोमंसमाप्य॥श्वोभूते पूर्वाह्णे पुनःप्रणीय॥अग्निर्व्रतभृतेष्टिः॥इष्ट्यसंभ
वेउद्धरजन्यप्रा०करिष्ये॥अग्नयेव्रतभृते स्वाहा॥अग्नयेव्रतभृत इदं॥आहवनी

१३

पेत्सु हुयात्॥ सर्वप्रायश्चित्तं विष्णुस्मरणं॥ इत्यनुद्धरणप्रायश्चित्तं॥ अथाग्निब
हिःपतन प्रायश्चित्तं॥ अथाग्नयाहवनीयस्यैकदेशः समस्तो वा हवनीयोर्वाक्
शम्यापरासात्पतेत् तदा॥ इदं त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व॥ सं
वेशने तन्व १ श्चारुरेधि प्रियो देवानां परमे जनित्रे॥ इत्यनेन मंत्रेणायतने प्रक्षि
प्य॥ बहिःपतन जनितं करिष्ये॥ भूर्भुवस्सुवस्वाहा॥ प्रजापतय इदं॥ विष्णुस्मरणं
॥ एन स्फुलिंगेन भवति॥ तस्य प्रायश्चित्तकालावधिस्थातुं व धिक्यत्वात्॥ अथगा
र्हपत्यदक्षिणाग्न्योः शम्यापरासार्द्वाक्॥ आयतनाद्बहिःपतने तच्छिं प्रक्षिपेत् स
र्वप्रायश्चित्तं॥ शम्यापरासादूर्ध्वं आहवनीयं पतितश्चेत् तद्धीं प्रक्षिप्य॥ पार्थिवृ ते
ष्टिः पूर्णाहुतिः॥ इत्यग्निबहिःपतनप्रायश्चित्तं॥ अथ यद्यमावास्यां पौर्णमासीं वाती

27

यात्॥यद्यन्यस्याग्निषुस्वाग्निबुध्यायागं कुर्यात्॥यदि अस्याग्निषु अन्यो वा स्वा
ग्निषु बुध्याय जेत्॥यदि अस्याग्निनन्या वाग्निर्ध्येवेयात्॥तदा उक्तप्रायश्चित्तं
कर्त्तव्यं॥अथ परिधिनिधानोत्तरं प्रयाजेभ्यः प्राक्परिधे र्बहिः पुरस्तादंगारः
पतेत्तदा॥ब्रह्मा तदंगारं स्रुवदंडेन पात्रांतरे निदध्यात्॥मा तपो मा यज्ञस्तपन्मा
यज्ञपतिस्तपत्॥नमस्ते अस्त्वायते नमो रुद्र परायते नमो यत्र निषादसि॥
अध्वर्युं मा हिंसीः॥यजमानं मा हिंसीः॥इत्यभिमंत्रयेत्॥अथैनमायतनस्थे
ग्नौ प्रक्षिपेत्॥आहं यज्ञं दधे निर्ऋतेरुपस्थात्तं देवेषु परिददामि विद्वान्॥सुप्र
जास्त्वं शतहिमा मदं तइह नो देवा मयि शर्म यच्छत॥प्रहृतांगारे ब्रह्मा स्रुवेणाजु
हुयात्॥सहस्रशृंगो वृषभो जातवेदाः स्तोमपृष्ठो घृतवान्सुप्रतीकः॥मानोहिं

सीर्द्धिंसिनोनेवाजहाभिगोपोषंचनोवीरपोषंचयच्छस्वाहा॥अग्नयइदं॥य
दिदक्षिणातःपतेत्तदा॥ब्रह्माणंमाहिंसीः॥यजमानमाहिंसीः॥यदिपश्चात्पतेत्॥
होतारंमाहिंसीः॥इतिविशेषः॥इतिपरिनिधानोत्तरांगारबहिःपतनप्रायश्चि
त्तं॥अथसमारूढोग्निर्मथ्यमानोविहरणकालेनजायेततदालौकिकाग्निमा
नीयप्रकृतिवत्स्वरणीयहोमःकार्यः॥समाप्तेहोमेपुनर्मथनंप्रत्यवरोहेतिमंत्रेण
॥एतद्विहरणकाले न्मंथनैमेकार्यं॥
इतोजज्ञेप्रथममेभ्योयोनिभ्योअधिजातवेदाः॥सगायत्र्यात्रिष्टुभाजगत्या
नुष्टुभाचदेवेभ्योहव्यंवहतुःप्रजानन्॥इतिमंत्रेण॥यदिमंथनप्रयत्नोव्यर्थस्यात्त
दामंथनस्यमंत्रस्यचपुनःपुनरावृत्तिः॥ततस्तपस्वतीष्टिः॥ततोअनुद्धरणप्रा

अ० प्रा०

१५

यश्चित्तसहितो होमः॥ होमकालातिपत्तौ मनस्वती होमोपि॥ इत्यनुगतप्रायश्चि
त्तं॥ अथ यद्यनस्तमिते अस्तमिताभ्यां स्यां होमो भवति तदा तस्मिन्नेवाहवनीये
पुनर्होमः॥ होमोत्तरं यजमानो गार्हपत्याहवनीयावुपतिष्ठते॥ भवतन्नः समनसौ
समोकसावरेपसौ॥ मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ मघनः॥
एवं प्रातः॥ अथाहवनीये प्रणीतेनुगतभ्यां स्यान्योग्निरुद्ध्रियेत आयतनस्थमनुप
श्येत्तदा॥ आयतनस्थमुद्धृत्य॥ इदानीमुपस्थितेनि दध्यात्॥ सर्वप्रायश्चित्तं॥ यद्यनस्तु
पश्येत्तस्मिन्नेवाग्नौ उद्धृतं प्रक्षिपेत्तदा॥ अग्नयेग्निवतेष्टिः॥ इष्ट्यसंभवे अग्नाव
ग्न्युद्धरणजन्यप्रा०॥ अग्नयेग्निवतेष्टिस्थाने पूर्णाहुतिं होष्यामि॥ अग्नयेग्निवते
स्वाहा॥ अग्नयेग्निवत इदं॥ आहवनीये जुहुयात्॥ विष्णुस्मरणं॥ ततो होमः॥

१५ राम

(30)

समाप्तेहोहोमेपुनराहवनीयंप्रणीय॥गार्हपत्याहवनीयसंसर्गजन्य०॥अग्न
येवीतयेष्टिस्थाने पूर्णाहुतिः॥अग्नयेवीतयेस्वाहा॥अग्नयेवीतयइदं०॥सर्वप्रा
यश्चितं विष्णुस्मरणं॥गार्हपत्योदक्षिणाग्न्योराहवनीयसंसर्गेतुविविचयेष्टिरिति
विशेषः॥सर्वंपूर्ववत्॥इत्यग्निसंसर्गप्रायश्चित्तं॥अथयजमानोदेशांतरमृतप्रा
यश्चित्तं॥अथयजमानोदेशांतरमृतश्चेत्तदा॥पत्नीऋत्विक्द्वारापार्थिवहुतीं
हुत्वातेष्ववाग्निषुभिन्नजातीयवत्सायाः॥मृतवत्सायाःपयसावा॥अग्निहोत्र
ममंत्रकंकारयेत्॥प्रजापतिःसर्वत्रदेवताः॥तूष्णींहोमत्वात्॥भक्षणंलुप्यते॥
सर्वहुतत्वानापराग्निहोमः॥इतियजमानोदेशांतरमृतप्रायश्चित्तं॥अग्निहो
त्रहवणीस्रुवभेदनप्रायश्चित्तं॥अथाग्निहोत्रहवणीभिद्येत्तदाअन्यमाहृत्यत

१६

याज्जुहुयात्॥भिन्नांप्राक्दंडांप्रत्यक्पुष्करामाहवनीयेभ्यादध्यात्॥स्रुग्भेदेनजन्य
०करिष्ये॥सर्वप्रायश्चित्तं अथाहिताग्निप्रातरस्नातप्रायश्चित्तं॥आहिताग्निः
प्रातरस्नातोग्निहोत्रंजुहुयात्॥तदाअग्नयेवरुणायेष्टिः॥इष्ट्यसंभवेप्रातरस्न
तोग्निहोत्रहवनजन्य०॥अग्निवरुणेष्टिस्थापूर्णाहुतिः॥अग्नयेवरुणायस्वा
हा॥अग्नयेवरुणायेदं०॥आहवनीयेजुहुयात्॥सर्वप्रायश्चित्तं॥इत्यग्निहोत्रप्र
करणं॥अथदर्शपूर्णमासप्रकरणं॥पिंडपितृयज्ञेऽनुध्दृतोल्मुकनाशप्रायश्चित्तं॥
उल्मुकनाशजनित०सर्वप्रायश्चित्तं॥भूर्भुवस्वस्वाहा॥प्रजापतयइदं॥दक्षिणा
ग्नौहुत्वापुनरुल्मुकोद्धरणं॥इत्युल्मुकनाशप्रायश्चित्तं॥अथान्वाहितप्रायश्चि
त्तं॥यदिअन्वाहितयोर्गार्हपत्याहवनीययोःसर्वेषांवा॥अनुगमनेउद्यास्तोभ
वतश्चेन्नपुनराधानं॥किंतुतत्तदग्नेरन्वाहितप्रायश्चित्तमेव॥अन्वाहिताग्नेः

१६

प्रयाणविधिः॥ अथान्वाहिताग्नेः केनचिद्धेतुना प्रयाणोपस्थितौ पृथग्भा
जनैरग्निं नयेयुः॥ अथ समारोप्याजिगमिषायां सत्यां आज्यं संस्कृत्य॥ तुभ्यं ता अं
गिरस्तम विश्वाः सुक्षितयः पृथक्॥ अग्ने कामाय येमिरे स्वाहा॥ अग्नये कामाय
इदं॥ स्रुवेणाहवनीये जुहुयात्॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः॥ तं
जानन्नग्न आसीदाथा नो वर्द्धया गिरः॥ इति मंत्रेणारणीगार्हपत्ये प्रतितपेत्॥ दक्षि
णाग्न्यादेर्भिंनयोनित्वे त्वेनैव त्रिष्वपि समारोपः॥ एकयोनित्वे तु गार्हपत्यमंत्रेण तू
ष्णीमितरयोः॥ ततो भयरहितं देशं प्राप्य यजमानो विहारं परिकल्पयेत्॥ प्रत्यव
रोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनः प्रजानन्॥ प्रजां पुष्टिं रयिमस्मासु धेह्यथा
भव यजमानाय शंयोः॥ इति मंत्रेण मंथयेत्॥ प्रतिमंथनमंत्रावृत्तिः॥ ततो गार्ह

१८

पत्यायतनेनिधाय तूष्णीं प्रणीय सर्वप्रायश्चित्तं हुत्वा ॥ हुतां नादारभ्य कर्म समापयेत् ॥
यद्वा उक्ता हुत्यनंतरं ॥ या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं ॥ अच्छा वसूनि कृ
ण्वन्नस्मे नर्या पुरूणि ॥ यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः [illegible] ॥
इति त्यनेन मंत्रेण पाणिस्थं देवगार्हपत्ये प्रतितपेत् ॥ इतरयोस्तूष्णीमिति केचि
त् ॥ पाणिसमारोपे तु यावदग्निजन्म तावद्यजमानोऽरणी संस्पृश्य मंथयेत् ॥
ततः आयतने निधानादि पूर्ववत् ॥ अनन्वाहिताग्नेः प्रयाणे समारोप्यैवं गच्छेत् ॥
न तत्र तु भ्यंताइत्याहुतिः ॥ पाणीसमारोपस्तु यजमानकर्तृक एव ॥ इत्यन्वाहितानन्वा
हिताग्नेः प्रयाणविधिः ॥ अथ हविर्दोषप्रायश्चित्तं ॥ तत्रावाहनादूर्ध्वं प्रधानयागाद्वा क्केश
नखवल्मीटमार्जारभक्षणादिना हविर्व्यापद्येत तदा ॥ तस्य स्थाने ध्रुवातः च तनर्गृहीत माज्य

१८

मवदायययजेत॥अव्यापन्नैर्यथापूर्वंसमापयेत्॥ततोव्यापन्नमात्रस्यैव आग्नेयन्वाधा
नादिपुनर्योगःकर्त्तव्यः॥एवंद्वयोर्बहूनां ज्ञेयं॥तद्यथा॥आग्नेयादीनांपुनर्दर्शेपूर्णमासा
भ्यांयक्ष्यइतिसंकल्प्यविष्णुदादिद्रव्यस्यैतांपुनरिष्टिः॥प्रधानयागोत्तरंनाज्यशेषमाज्ये
नैवकार्यं॥नपुनरुत्पत्तिः॥दुष्टानिहवींषितूष्णीमप्सुप्रक्षिपेत्॥दुष्टंसानाय्यंवल्मीक
द्वारे॥प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥यत्कामास्तेजुहुमस्तंनो
अस्तुवयंस्यामपतयोरयीणां॥इतिमंत्रेणजुहुयात्॥केशादिद्रव्यसंसर्गेहविषि
प्रायश्चित्तमुक्तं॥इतिहविर्दोषप्रायश्चित्तं॥अथसान्नायहविर्दोषप्रायश्चित्तं॥अथसां
नाय्यपाकसमये कुंभीममतीत्यबहिःपततिचेत्तदातस्याअंतरेआदाय॥मुहीद्यौःपृथि
वीचनइमंयज्ञंमिमिक्षतां॥पिपृतांनोभरीमभिः॥इतिमंत्रेणपरिधिदेशेनिनयेत्॥नत्वा

१८

हाकारः॥स्थालीगतेनयागपर्याप्तिश्चेत्तेनैवयागः॥अपर्याप्तश्चेत्तदप्सुप्रक्षिप्य
पुनर्मंत्रेणसान्नाय्योत्पत्तिः॥अथाधिश्रितंसान्नाय्यंकुंभीभेदनेनअग्नावेवसर्वं
पतितंचेद्भूपतयेस्वाहाभुवनपतये०भूतानांपतये० हत्यभिमंत्र्यपुनरुत्पत्तिः॥
सायंदोहप्रातर्दोहचेदंसमानंस्थालीगतेनशेषेणयागः॥यदिअशेषसायंदो
हेनष्टेप्रातर्दोहेनष्टेऐंद्रंमाहेंद्रंवाएकादशकपालंनिरूप्यसान्नाय्यवत्सहैवयागः॥
उभयत्रऐंद्राग्नंमाहेंद्रंवापंचशरावपरिमितान्व्रीहिंनिरूप्यस्तुअनुष्टिप्रत्याम्नायः
शरावस्तेनत्रिर्यजुषादितूष्णींनिर्वापः॥गार्हपत्येश्रपयित्वाद्वयोःपात्रयोःहुत्वा॥प्र
चरणकालेअस्मादेवहविषः॥अग्निंप्रथमंइष्ट्वा॥अनंतरंइंद्रंमहेंद्रंवायजेत॥
यद्वाइंद्रएवयष्टव्यइतिकेचित्॥एतत्सर्वंप्रधानयागनिवृत्तेनभवति॥तत्रस्विष्टकृ

१८

38

नादि सर्वं आज्येन ॥ सर्वप्रायश्चित्तं ॥ एवमाज्यमसंतं दुष्टं चेज्जले प्रक्षिप्य ॥ अन्य
संस्कृत्य प्रचारः ॥ अग्निहोत्रोच्छेषेण नाशोतं दुले रात्रं चनं सर्वप्रायश्चित्तं ॥ इति
हविर्दोषप्रायश्चित्तं ॥ अथ हविर्दोषक्लृप्ता ॥ यद्यहविरपक्वं भवति तदा तेनैव या
गं समाप्य ॥ चतुःशरावमोदनं दक्षिणाग्नौ अपयित्वा चतुरो ब्राह्मणान् भोजयेत्
अथ हविषि एकादेशादग्धे तच्छेषेण छ्या सर्वप्रायश्चित्तं कृत्वा तामेव देवतां पु
नर्यजेत् ॥ तत्र दृष्ट्याय दक्षिणां दद्यान् ऋत्विग्भ्यः ॥ सर्वशो दग्धे तं प्रयोगं समा
प्य ॥ पुनरन्वाधानादि सर्वं यागः ॥ अथ आवाहनकालात्पूर्वं हविर्दोषित त्स्येव ह
विषः पुनरुत्पत्तिं कृत्वा यागः समाप्तिः ॥ अथावाहनादूर्ध्वं प्रधानयागात्पूर्वं हवि
र्दोषे आज्येनेष्टि समाप्य पुनर्यागः ॥ अथ गृहीतावदाननाशे पुनस्तत एवाव

दाययजेत्॥अथ सर्वप्रायश्चित्तं॥इति हविरपक्वगन्ध प्रायश्चित्तं॥अथ हविषांका
कादिस्पर्शे पक्षवाते वा॥इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं॥समूढमस्य पांसुरे
स्वाहा॥विष्णव इदं॥तद्धविरप्सु प्रक्षिपेत्॥पुनर्हविरुत्पत्तिमादितो विधाय यजेत्॥
इदं हविर्दोष प्रायश्चित्तं॥अथ स्कंन प्रायश्चित्तं॥स्कंन द्रव्यमभिमृश्य॥देवाजन
मगन्यज्ञस्तस्यमाशीरवतु वर्द्धतां॥भूमिर्घृतेन मुंचतु यज्ञो यज्ञपतिमंहसः॥भूप
तये स्वाहा॥भुवनपतये स्वाहा॥भूतानां पतये स्वाहा॥यज्ञस्य त्वा प्रमयोन्मयाभि
मया प्रतिमय॥द्रप्सश्चस्कंद प्रथमां अनु द्यूनिमं च योनिमनु यश्च पूर्वः॥समानं योनि
मनुसंचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः॥इत्यभिमृश्य जपेत्॥हविस्कंन जन्यं क
रिष्ये॥सर्वप्रायश्चित्तं॥इदं च आहनि परिमिते द्रव्ये भवति॥न न्यूने॥न्यूने तु सर्वप्रा

यश्चित्तं मेव ॥ आहुति हूयमाना परिधि वहिः पतेन दाता आग्नीध्रः पूर्वोक्त क्रमेण
भिमृश्य तद्दर्वी जुहुयात् ॥ ततः आग्नीध्राय पूर्णपात्रं दद्यात् ॥ वरुण प्रघासेषु करंभा
हुति हूयमाना परिधि बहिः पतेन्न दा इदमेव प्रायश्चित्तं ॥ आहुति बहिः पतन अन्यं
सर्व प्रायश्चित्तं ॥ इत्याहुति परिधि बहिः पतन प्रायश्चित्तं ॥ अथ आज्यव्रीहितंदुला
दिनिर्वापादूर्ध्वं उत्पवनात्प्राक्स्कंदने प्रायश्चित्तं ॥ अज्यव्रीहितंदुलादिनिर्वापादू
र्ध्वं उत्पवनात्प्रास्कंदेत्तदा यत्किंचित्स्पृशुजानियंतन्मृत्यंवा अध्वर्यवे दद्यात् ॥ अ
ध्वर्युस्तत्स्रातिगच्छ्याभिमंत्र्य सर्व प्रायश्चित्तं ॥ उत्पवने कृते यदि स्कंदेत्तदाचि
त्तं वस्तु दद्यात् ॥ ततोभिमर्शनं सर्व प्रायश्चित्तं ॥ यदि स्रुग्गतस्य प्राग्घोमात्स्कंद
ने पुष्कलं देयं ॥ ततः संत्वा सिंचामि यजुषा प्रजामायुर्धनं च ॥ बृहस्पति प्रसूतो

यजमानइहमारिषत्॥ इति मंत्रेण जलमासिंचेत्॥ देवांजनमगन्यज्ञ इत्यभिमंत्र्य॥
स्रुग्गताज्यस्कंदनजनितं॰ सर्वप्रायश्चित्तं॥ यावद्धुतं तावद्देवशुक्रंत्वे त्यादिनिर्वाप
मंत्रेण निर्वापः॥ अथो द्वासनादूर्ध्वं यत्किंचित्सान्नाय्यस्कंदने यत्किंचित्प्राणिजातं
यं॥ देवांजनमगन्यज्ञ इत्यभिमंत्र्य सर्वप्रायश्चित्तं कर्त्तव्यं॥ इत्याज्यव्रीहिसांनाय्य
स्कंनप्रायश्चित्तं॥ अथ कपालभेदप्रायश्चित्तं॥ कपालं यदि भेदेत्तदा॥ गायत्र्यात्वा श
ताक्षरया संदधामि॥ इति मंत्रेण संधाय यद्भिन्नं तत्॥ अभिनो घर्मो जीरदानुर्यत आ
र्त्तस्तदगन्पुनः॥ इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनु संतरंतु॥ त्रयस्त्रिंश
त्तंतवो यान्वितन्वत इमं यज्ञं स्वधया ये यजंते॥ तेभिश्छिद्रं प्रतिदध्मो यजत्रस्वा
हायज्ञो अप्येतु देवान्॥ इति द्वाभ्यां मंत्रेण जले प्रक्षेपः॥ कपालभेदजनित॰॥ स

र्वप्रायश्चित्तं करिष्ये ॥ एवं स्वादिभिरवलीढाभिः ॥ अशुद्धद्रव्यस्पृष्टानि वा कपाला
अभिन्नेति द्वाभ्यां जले निक्षिपेत् ॥ सर्वप्रायश्चित्तं ॥ अत्र यद्यपि भेदाभावात्संधानं गाय
त्र्यावेति मंत्रेण अर्थो लुप्तं ॥ तथापि प्रकृते प्रधानमंत्रैरुपधानं तु निर्बाधमेव ॥ इ
ति कपालभेद प्रायश्चित्तं ॥ अथान्यानि मृन्मयानि भिन्नानि प्रायश्चित्तं ॥ अथान्यानि
मृन्मयानि अशुचिस्पृष्टानि भिन्नानि वा ॥ भूमिर्भूमिमगान्माता मातरमप्यगात् ॥ भू
यास्म पुत्रैः पशुभिर्यो द्वेष्टि स भिद्यतां ॥ इति मंत्रेण जले प्रक्षिपेत् ॥ सर्वप्रायश्चित्तं ॥
इति मृन्मयभिन्न प्रायश्चित्तं ॥ अथ कपालनाश प्रायश्चित्तं ॥ उपघाताद्धूर्ध्वं पुरो
डाशश्रपणात्प्राग्यदि कपालं नश्येत्तदा ॥ कपालभिन्नजनितं अश्विष्टिस्थाने पूर्णा
हुतिः ॥ अनुद्वासितेन ष्टे वैश्वानरेष्टिः पूर्णाहुतिः ॥ प्रयोगमध्ये इष्टीस्थाने पूर्णाहुति

वा॥प्रयोगसमाप्तौवासर्वप्रायश्चित्तं॥इतिकपालनाशप्रायश्चित्तं॥अथपुरोडा
शभेदप्रायश्चित्तं॥अथपुरोडाशभेदेनपतनेवा॥किमुत्सतसिकिमुत्सोष्ठाः शांतः
शांतेरिहागहि॥अघोरोयज्ञियोभूत्वासीदसदनंस्वमासीदसदनस्वं॥इतिमंत्रेण
बर्हिषिपुरोडाशंनिधाय॥माहिंसीर्देवप्रेरितआज्येनतेजसाज्यस्वमानःकिंचनरी
रिषः॥योगक्षेमस्यशांत्याअस्मिन्नासीदबर्हिषि॥इतिमंत्रेणाभिमंत्र्य॥भेदेनपत
नजनितं॰सर्वप्रायश्चित्तं॥इतिपुरोडाशभेदेनपतनप्रायश्चित्तं॥अनृतवदनेसी
मातिक्रमेनिषिद्धमरणेस्त्रीसंगेबुद्धिपूर्वकरेतस्कंदनेइत्यादिनिमित्तेषुव्रातपतेष्टिः
पूर्णाहुतिः॥अन्वाधानेष्टिमध्येव्रतलोपप्रायश्चित्तं॰।अग्नयेव्रतपतयेस्वाहा॥अ
ग्नयेव्रतपतइदं॥सर्वप्रायश्चित्तंविष्णुस्मरणं॥इतिव्रतलोपप्रायश्चित्तं॥अथ

अमावास्याप्रयोगे आरब्धे यदि पुरस्ताच्चंद्रमा अभ्युदियात्तदा ॥ त्रैधातवीयेष्टिः ॥
तत्रस्तु प्रयोगरत्ने द्रष्टव्यः ॥ अथ प्रणीतास्कंदनप्रायश्चित्तं ॥ अथ संवापात्पूर्वं प्रणी
ताआपो भूमौ निःशेषं पतेयुस्तदा ॥ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन ॥ महे र
णाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ तस्मा अ
रंगमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥ पुनर्गृहीत्वा ॥ प्रणीतापांस्कं
नजनितं० करिष्ये ॥ ततं म आपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ॥ अ
यं समुद्र उत विश्वभेषज स्वाहाकृतस्य समुतृप्णुत ऋभवस्वाहा ॥ ऋभुभ्य इदं ॥
सर्वप्राय० ॥ शेषस्कंदने उक्तप्रायश्चित्तं कृत्वा ॥ शेषेणैव संवापः ॥ संवापादूर्ध्वं स
र्वप्रायश्चित्तमेव ॥ इति प्रतापस्कंनप्रायश्चित्तं ॥ अथ उपघातप्रायश्चित्तं ॥ अथ दर्शपू

र्णमासादौ हविः प्रोक्षणं कुर्वन्न्यग्निमभिप्रोक्षेत् ॥ पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ॥ घृतेन त्वं तन्वो वर्द्धयस्व सत्याः संतु यजमानस्य कामाः ॥ इत्युदकोपहतमग्निमुपसमिंध्य ॥ वसुनीथायेदं ॥ सर्वप्रायश्चित्तं ॥ एवं परिषेचरिष्यपिंड दृष्टव्यं ॥ इत्युपघातप्रायश्चित्तं ॥ अथ पूर्णमासप्रतिबंधे प्रायश्चित्तं ॥ अथ आधानोत्तरं केनचिद्धेतुना दर्शपूर्णमासो नारब्धौ पत्नी वा रजस्वला तदा आगामिन्यां पौर्णमावास्यां सारस्वतहोममन्वारंभणीयां च कृत्वा विभ्रष्टेष्टिं कुर्यात् ॥ ततो दर्शपूर्णमासार्थं सारस्वतहोमान्वारंभणीयां च विधाय चतुर्होतारं हुत्वा पौर्णमासेन यजेत् ॥ अथ मदर्शेप्यतिपन्ने आगामि दर्शे विभ्रष्टेष्टिं कुर्यात् ॥ एवमाधानवत्सरे पशुबंधवत् अकरणे प्रथममाग्रयणाकरणे विभ्रष्टेष्टिः ॥ इति प्रथमदर्शपूर्णमासाग्रयणप्रतिबंधे प्रायश्चित्तं ॥ अथ दर्शादपूर्णमासयोरन्वाधाने कृते पत्नी रजस्वला चेत्तामवरुध्य यागं कुर्या

त्॥ तत्रयोक्तं वेदेः पश्चादुदगग्नेःस्थापयेत्॥ पैषेपत्नीसंनह्यतिलुप्यते॥ तेजोसीत्यधि
श्रयणांतेजसेत्वेत्सपादानंचलुप्यते॥ पत्नीसंबधिमुपस्थानादिहोमकर्तृकचमपू
र्णपात्रसंबधिलुप्यते॥ पत्नीसंयाजेविधेयः॥ एवमिष्टिंसमापयेत्॥ ततो ऋतुगम
ने॥ अमूहमस्मि॥ सात्वं॥ घोरहं॥ पृथिवीत्वं॥ सामहं॥ ऋकृत्वं॥ तावेकोसंभवाव॥ सह
रेते॥ दधावहै॥ सं॰से पुत्रायवेत्तवे॥ रायस्पोषा सुप्रजास्त्वायसुवीर्याय॥ इतिश्रा
द्धानं॥ ततः विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिं॰शतु॥ आसिंचतुप्रजापतिर्धा
तागर्भंदधातुते॥ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति॥ गर्भंतेअश्विनौदेवावाध
त्तांपुष्करस्रजा॥ हिरण्ययीअरणीयंनिर्मंथतोअश्विना॥ तंतेगर्भं॰हवामहेदश
मेमासिसूतवे॥ यथेयंपृथिवीमहीतिष्ठंतगर्भमादधे॥ एवंतंगर्भमाधत्स्वदशमे

४५

मासिसूतवे॥यथापृथिव्यग्निगर्भाद्यौर्यथेन्द्रेणगर्भिणी॥वायुर्यथादिशांगर्भ
एवंगर्भंदधातुते॥विष्णुःश्रेष्ठेनरूपेणास्यांनार्यांगवीन्यां॥पुमांसंगर्भमाधेहि
दशमेमासिसूतवे॥नेजमेषपरापतसुपुत्रःपुनरापत॥अस्यैमेपुत्रकामायैग
र्भमाधेहियःपुमान्॥व्यस्ययोनिंप्रतिरेतोगृहाणपुमान्पुत्रोधीयतांगर्भोअं
तः॥तंमातादशमासोबिभर्तिसजायतांवीरतमःस्वानां॥आतेगर्भोयोनिमेतुपुमा
न्बाणइवेषुधिं॥आवीरोजायतांपुत्रस्तेदशमास्यः॥करोमितेप्राजापत्यमागर्भोयो
निमेतुते॥अनूनःपूर्णोजायतामश्लोणोऽपिशाचधीतः॥पुमांस्तेपुत्रोनारितंपुमा
ननुजायतां॥तानिभद्राणिबीजान्यृषभाजनयंतिनौ॥यानिभद्राणिबीजान्यृष
भाजनयंतुनः॥तैस्त्वंविंदस्वसाप्रसूर्धेनुकाभवांकामःसमृध्यतामह्यमपराजित

मेवमे॥यंकामंकामयेदेवतन्मेवायोसमर्द्धय॥इत्यादित्रयोदश ऋग्भिमंत्र्य॥हिंकृत्यता
